श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ क्षान्तिस्तबकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ क्षान्तिस्तबकः ॥

त्रायतामायताक्षं तद्धाम तामरसालयम्।
मदागसां प्रतीकारे महतामपि यत्क्षमा॥ १॥

अपराधपरम्परामपाराम्
अहमेवं यदि नाम नारचेयम्।
कमलायतने क्षमागुणस्ते
कथमात्मानमसौ लभेत मातः॥ २॥

महतां मम घोरकिल्बिषाणां
इह निःशेषगवेषणाऽपि दूरे।
पततामवलम्बनाय मातः
भवपङ्के बत नस्तव क्षमातः॥ ३॥

फणिशेखरशैलनाथकान्ते
भवती मूर्तिमती क्षमैव नूनम्।
अभवत् कथमन्यथा न पाप-
स्तव कोपप्रभवाय वायसोऽपि॥ ४॥

भवतीं प्रति विश्वमातरं
भवसिन्धोस्तरणार्थमातरम्।
स्वमहं प्रदिशामि रक्ष माम्
अपराधेषु समाचर क्षमाम्॥ ५॥

नित्यं त्वकृत्यमवशादपि न त्यजामि
कृत्यं घुणाक्षरनयादपि नाचरामि।
अत्यन्तमित्थमपराधमहोदधेर्मे
सत्यं शपे शरणमम्ब तव क्षमैव॥ ६॥

www.prapatti.com

मातः क्षमा तव सखी मधुवैरिकान्ते
    ख्यातः क्षमाधरतया निलयस्स शेषः।
त्वं तु क्षमानिधिरतः शतमागसां मे
    क्षन्तुं तवोचितमशेषत एव तावत्॥ ७॥

अस्मत्कृतामतितरामपराधपङ्क्तिं
    यन्मृष्यसे जननि तत्र न विस्मयो नः।
एवंविधोऽपि विलिलङ्घयिषे भवं यत्
    तत्र क्षमा हि तव कस्य न विस्मयाय॥ ८॥

तत्तद्विचित्रदुरितानुगुणानि तीक्ष्णे
    दातुं फलानि दयिते तव बद्धदीक्षे।
कस्येह जीवितकथा कलशाब्धिकन्ये
    क्षान्तिं न चेन्नयसि तं विविधैरुपायैः॥ ९॥

अक्षान्तकारिणि दशास्यवधोक्तिदृप्ते
    भक्षाय राक्षसवधूरभियाचमाने।
हन्त क्षमोदयजुषोऽप्यनुकम्पयैव
    नक्षत्रनाथसहजे तव न क्षमाऽभूत्॥ १०॥

धनपतिपुरुहूतस्थाणुवेधो मुखानाम्
    अपि च दधति शापं सम्पदः सम्परायम्।
इति गतिमवबुध्याप्यर्थकामाभिलाषात्
    अजहदघशतं मां रक्ष मातः क्षमातः॥ ११॥

अनिशमुपचितानामागसां भूयसां मे
    निगमविततिरीष्टे निष्कृतिं नाभिधातुम्।
प्रभवति फलमेषां पद्मनाभो न दातुं
    कलशजलधिकन्ये क्षान्तिरेवेह युक्ता॥ १२॥

अमितदुरितकृद्भ्यो नित्यमस्मादृशेभ्यो
    हतहितचरितेभ्यो हन्त कुप्यन्तमुच्चैः।

नियतमनुगुणेन न्याययुक्तेन पद्मे
    कलयसि वचनेन क्षान्तिमन्तं प्रभुं तम्॥ १३ ॥

कलयति मनसा वा कर्मणा वा गिरा वा
    मधुरिपुमहिले यन्मादृशो नित्यमागः।
तदिदमगणयन्ती त्रायसे संसृतेर्नः
    शरणमिति गिरैव स्वामिनं क्षामयन्ती॥ १४ ॥

नवनवमपराधं साधयित्वा खलत्वात्
    जननि कृतवतो मे माधवं क्रोधवन्तम्।
वरुणनिलयकन्ये क्षान्तिमत्या भवत्याः
    शरणवरणतोऽन्यत् केवलं नावलम्बः॥ १५ ॥

प्रथिततमसि सर्गैरागसां रागसान्द्रे
    मयि यदि तु विधत्से नानुकम्पामकम्पाम्।
उपचितिमतिचित्रामेनसो मे न सोढुं
    प्रभवति स भवत्या नायकोऽजेयकोपः॥ १६ ॥

रचयति यदयं ते नेतरागः सरागः
    तदखिलमपि मृष्यन् त्राहि दीनं त्वमेनम्।
ननु क इह विमर्शे नापराधीति शौरेः
    कलशजलधिकन्ये कर्णयोर्वर्णयोच्चैः॥ १७ ॥

जलजटिलतडित्वद्दीप्तिकृष्णोपलाल्या
    कृतिरुरुकटकश्रीरुज्ज्वलन्मेखलाभा।
वरतमवनमालालङ्कृतस्थानजुष्टा
    वहसि हरिपुरन्ध्रि त्वं क्षमाभृत्त्वमर्हम्॥ १८ ॥

पापारण्य हिरण्यदानववपुर्व्यापाटन प्रज्वलत्-
    कोपाटोपकृपीडसम्भवनवज्वालाकराळाननम्।
देवाद्यैरपि दुष्करप्रसदनं देवं नृसिंहं रमे
    क्षान्तिं नीतवती क्षणेन भवती किं ते परं दुष्करम्॥ १९ ॥

www.prapatti.com

नियन्ता यः पद्मे निरवधिदुरागः शतकृताम्
अपर्याप्तं जानात्यखिलनिरयव्रातमपि नः।
स एष त्वद्वाचा निखिलमपि सोढ्वाऽपचरितं
फलं वेत्ति स्वल्पं तदपि शरणोक्तेर्निजपदम्॥ २०॥

क्षमां मूर्तामुद्यत्करचरणयोगां च करुणां
हतावद्यां विद्यामवयववतीमम्ब भवतीम्।
समाश्रित्यापत्याभ्युदय धनधान्यादिनिबिडः
बिडौजः सम्पत्तिं परिहसति भूमावपि जनः॥ २१॥

क्षान्ते मन्तौ जननि सकले क्षम्यतां शब्दमात्रात्
भूयो भूयः कमपि निचयं पाप्मनां निर्मिमाणः।
वक्तुं लज्जे पुनरपि सहस्वेति वाराशिकन्ये
क्षान्तिं सा त्वां तदपि नयते काप्यकम्पानुकम्पा॥ २२॥

कादाचित्कप्रपदनजुषां काङ्क्षतान् पुरुषार्थान्
अत्रामुत्राप्यखिलजननि प्राणिनामर्पयन्तीम्।
संत्यज्य त्वामपकृतिशतैरप्यशुष्यत्कटाक्षां
भिक्षार्कीं तु प्रसभमपरां देवतां सेवतां कः॥ २३॥

कृत्याकृत्य त्यजनकरणोत्साहिनां मादृशानां
को वा दोषः कमलनिलये त्वत्क्षमायाः स दोषः।
येनैतस्याः क्वचिदविषयो नापराधः समस्ती-
त्युद्यद्धैर्या वयमिह बहूनाचरामोऽपचारान्॥ २४॥

अशेषैर्निर्वेशैरखिलनरकावल्यनुभवैः
अघौघानास्माकानपि भृशमशक्यापनयनान्।
क्षमस्वेत्युक्त्यैव क्षपयसि मधुध्वंसिदयिते
क एषः क्षान्त्यात्मा कथय निरुपाख्यस्तव गुणः॥ २५॥

निर्मातुं प्रभवेम कर्म न वयं नित्यं किमप्यन्ततो
यत्खल्वाचमनं तदप्यकुशलाः कर्तुं यथाचोदनम्।

दूरे ज्ञानकथा तथापि तु तवाक्षामक्षमावेदिनः
जानीमो मनसैव देवि सुगमौ स्वर्गापवर्गावपि॥ २६ ॥

कथयामि सारमिह किं कथया
परमन्ययार्थितभवोपरमम्।
क्षमया त्वमेतमभिरक्ष मया
विहितानि मा गणय देवि हिता॥ २७ ॥

निगमविहितं प्रायश्चित्तं मदीयमहांहसां
निरसनकृते नालं मातस्तव क्षमया विना।
गुरुतरमयःपिण्डं गर्वान्निगीर्णमहो रमे
किमु जरयितुं शक्तं शुण्ठीकषायनिषेवणम्॥ २८ ॥

भगवति वपुश्चेतोवाग्भिः प्रतिक्षणमर्जितं
नवनवमिमं पापस्तोमं क्षमस्व मम स्वयम्।
कटकटरवक्रीडद् दंष्ट्रायुगी विकृताननं
पुनरपि यथा नो पश्येयं भयङ्करमन्तकम्॥ २९ ॥

सहमानाऽहरहर्मे सहस्रमागांसि सागरेन्द्रसुते।
स्थापयसि मां दयालो शरणव्रज्याधिराज्यपीठे त्वम्॥ ३० ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे क्षान्तिस्तबकः ॥